प्रश्न – शुकनासोपदेशानुसारेण राज्ञां दोषाः वर्णनीयाः।
अथवा, "एवं प्रायेऽतिकुटिलकष्टचेष्टासहस्रदारुणे राज्यतन्त्रे" इत्युक्तिं तदुपदेशानुसारेण विशदयत।

उत्तर →

बाणभट्टरचितायाः कादम्बर्याः भागविशेषः शुकनासोपदेशः। अत्र तारापीडस्य वृद्धः अमात्यः भाविनं युवराजं चन्द्रापीडमुपदिशति। उपदेशक्रमेण स यौवनकालस्य अहंकारादीन् दोषान् वर्णयति, गुरूपदेशस्य महत्वं दर्शयति, लक्ष्म्याः चरित्रं निरूपयति, अन्ततः दुष्टानां राज्ञां व्यवहारं दुर्दशाञ्च संकलयति। इत्थं शुकनासोपदेशः सार्वकालिकं साहित्यं विद्यते।

राज्ञां दोषाः अस्य तृतीये भागे वर्णिताः। दोषवर्णने शुकनासस्य उद्देश्यं वर्तते यत् युवराजः चन्द्रापीडः तद्दोषेभ्यः दूरं तिष्ठेत्। राजा राज्यस्य प्रधानः पुरुषः। तस्मिन् दोषयुक्ते सति सर्वं राज्यतन्त्रमाकुलं भवति। राज्यञ्च स्वयमेव कष्टास्पदम्। उक्तञ्च कालिदासेन शाकुन्तले– "राज्यं स्वहस्तधृतदण्डमिवातपत्रम्" इति। तेन राज्यसञ्चालने कष्टमेव सुखात् अधिकतरं जायते।

शुकनासः राजदोषवर्णने कथयति यत् राज्ञः अभिषेकसमये एव यत् कर्मकाण्डं भवति तदेव राजनि दोषजालं वितनोति। तथाहि मङ्गलकलशजलेन राज्ञो दाक्षिण्यं प्रक्षाल्यते, हवनधूमेन च मलिनीक्रियते हृदयम्, शिरसि पट्टबन्धनेन वृद्धावस्थायाः आगमरूपेण आच्छाद्यते। छत्रधारणेन परलोकभयं दूरीक्रियते। इत्थमभिषेककर्मकाण्डेन एव दोषाकुलो भवति इति कल्पितम्।

केचित् राजानः अल्पस्यापि धनस्य लोभात् गुणसमूहं विस्मरन्ति। विविधविषयाणां रसास्वादने लोलुपास्ते ज्ञानेन्द्रियैः कष्टं लभन्ते, मनसा च विह्वलीभवन्ति। तेषां दशा उन्मत्तवत् भवति। यथा ग्रहाविष्टाः भूताभिभूताः पिशाचग्रस्ताः वा जनाः व्यवहरन्ति, तथैव एते राजानोऽपि। धनमदेन दह्यमाना इव चेष्टन्ते, निरन्तरमसत्यभाषणेन संजातमुखरोगा इव एते अत्यल्पं जल्पन्ति। यथा आसन्नमृत्युः जनः बन्धुजनमपि नाभिजानाति तथैव दुष्टाः राजानः स्वसम्बन्धिनोऽपि नाभिजानन्ति। तृष्णाविषमूर्च्छितास्च सर्वं स्वर्णमयं पश्यन्ति। एवमेव शुकनासः दुष्टानां राज्ञाम् अनेकान् लोभमोहमदकामक्रोधादिविकारान् पृथक्-पृथक् वर्णयति।

राजान: आत्मानं पतितमपि नावगच्छन्ति।

अपरेऽपि राजान: विलासमयं जीवनं स्वीकुर्वन्त: निकृष्टतरा:। तेषां सभासु राजप्रशंसापरा चाटुकारा: निरन्तरं तिष्ठन्ति। एते च प्रशंसका: राज्ञां दोषानपि गुणा: इति व्याख्याय प्रख्यापयन्ति। यथा द्यूतं विनोद: इति कथयन्ति, मृगयाश्रम: इति, पानं विलास: इति, स्वच्छन्दता प्रभुत्वमिति, चञ्चलता उत्साह इति प्रतिपादयन्ति।

एते चाटुकारा: राजानं तदा मदयन्ति यद् राजापि आत्मानं देवं मन्यते। स आत्मानं विष्णुं शिवं सूर्यं वा देवं मन्यते। तेनाभिमानेन राज्ञो दृष्टिरपि परिवर्तते। यथा प्रजाभ्यो दर्शनप्रदानमपि राजा अनुग्रहं गणयति, सम्भाषणं संविभागमध्ये तथा आदेशं वरप्रदानं कथयति इति स्थिति:।

किञ्च स्वमहिम्न: मिथ्यागर्वेण पूरिता:, ते राजान: देवानां द्विजानां मान्यानां गुरूणाञ्च तिरस्कारं कुर्वन्ति। न वृद्धोपदेशं शृण्वन्ति, न च सचिवस्य परामर्शं विचारयन्ति, अपितु हितवादिने कुप्यन्ति। एते स्वप्रशंसकमेव जानन्ति, तेन सह तिष्ठन्ति, तं बहुमन्यन्ते। अत्र शुकनास: राज्ञां दोषाणां कारणानि विचारयति। तेषां प्रमाणं कौटिल्यशास्त्रं भवति, अभिचारकर्मणि कुशला: क्रूरस्वभावा: पुरोहिता: एव गुरव:। अतएव तेषां किमपि असाम्प्रतं नास्ति। अनेकराजभुक्तायां लक्ष्म्याम् आसक्त्या आचरणमपि तेषां दूषितम्। तेषां स्वभ्रातर: एव उच्छेद्या:। अतो राजान: प्राय: स्वार्थपरा: भवन्ति।

यस्मिन् राजनि एते दोषा: न भवन्ति स एव पूज्य: समाजे च सम्मानभाजनं भवति। शुकनासो भाविनं युवराजमपि उपदिशति यत् त्वया एते दोषा: न धारणीया:। तथा प्रयास: करणीय: यद् विद्वांस: न शोचन्तु, कुशला: न प्रतारयन्तु, भुजङ्गा: नास्वादयन्तु दुष्टाश्च न प्रमादयन्तु। तत एव संसारे प्रशंसा भवति। लक्ष्मीस्तु विद्वांसमपि धीरमपि पुरुषं खलीकरोति इति विस्तरेण राजदोषा: वर्णिता:। तेषां परिहार: आदर्शाय कल्पते इति काव्यात्मकस्यास्योपदेशस्य तात्पर्यम्।

— X —